# ॥ घोरकष्टोद्धरण स्तोत्र ॥

श्रीपाद श्रीवल्लभ त्वं सदैव । श्रीदत्तास्मान्पाहि देवाधिदेव ॥
भावग्राह्य क्लेशहारिन्सुकीर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥१॥
त्वं नो माता त्वं पिताऽऽप्तोऽधिपस्त्वं । त्राता योगक्षेमकृत्सद्गुरुस्त्वं ॥
त्वं सर्वस्वं नो प्रभो विश्वमूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥२॥
पापं तापं व्याधिंमाधिं च दैन्यं । भीतिं क्लेशं त्वं हराऽशु त्वदन्यम् ॥
त्रातारं नो वीक्ष ईशास्तजूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥३॥
नान्यस्त्राता नापि दाता न भर्ता । त्वत्तो देव त्वं शरण्योऽकहर्ता ॥
कुर्वात्रेयानुग्रहं पूर्णराते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥४॥
धर्मे प्रीतिं सन्मतिं देवभक्तिं । सत्संगाप्तिं देहि भुक्तिं च मुक्तिम् ॥
भावासक्तिं चाखिलाऽनन्दमूर्ते । घोरात्कष्टादुद्धरास्मान्नमस्ते ॥५॥
श्लोकपंचकमेतद्यो लोकमंगलवर्धनम् ।
प्रपठेन्नियतो भक्त्या स श्रीदत्तप्रियो भवेत् ॥६॥
॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य
श्रीमद्वासुदेवानन्दसरस्वतीस्वामीविरचितं
घोरकष्टोद्धरणस्तोत्रं संपूर्णम् ॥